प्रातिपदिकार्थषट्कविचारः

Sujith Subramanian
Research Scholar, Sree Sankaracharya University of Sanskrit, Kalady

Submitted on: 04/10/2020 Revised on: 12/10/2020 Accepted on: 15/10/2020

नाम्नोऽर्थः नामार्थः । नाम इत्युक्ते प्रातिपदिकम् । स्वादिप्रत्ययैः सहितं प्रातिपदिकं सुबन्तमित्युच्यते । 'तिङ् सुबन्तचयो वाक्यम्' इत्युक्तम् । वाक्ये पदानि विद्यन्ते । एकैकस्मात्पदात् एकैकः अर्थः अवबुद्ध्यते । तेषामर्थानामन्वये सति वाक्यार्थबोधो जायते । पदानि च सुबन्ततिङन्तानि[1] । तिङन्तानामपि व्याकरणदृष्ट्या अपोद्धारः क्रियते प्रकृतिप्रत्ययविभागेन । तत्र प्रकृतेरर्थो विद्यते, प्रत्ययस्य च । तत्र प्रकृतेः कोऽर्थः, प्रत्ययस्य कोऽर्थः इत्यत्रैव मतभेदः । प्रकृतिप्रत्ययसमुदायरूपात्पदात् अर्थः अवबुद्ध्यते । तस्य अर्थस्य कियानंशः प्रकृतितः अवबुद्ध्यते, कियाञ्च प्रत्ययादवबुद्ध्यते ? सुबन्ताज्जायमानाद्बोधात् कियानंशः प्रातिपदिकाद्भवति कियाञ्च विभक्तेर्भवति इत्यत्र विचारः ।

उदाहरणार्थं ''गामानय'' इति सुबन्ततिङन्तसमुदायरूपाद्वाक्यात् के के अर्थाः प्रतीयन्ते इति पश्यामश्चेत्,

१. आनयनक्रिया
२. प्रवर्तनाविषयत्वम्
३. कर्ता (त्वमित्यादि)
४. कर्म (गौः)
५. संख्या (एकत्वसंख्या)

इति लभ्यते । अत्र एकैकः शब्दः एकैकमर्थं बोधयति । यदि सर्वे अर्थाः आनय इति पदेन बोध्यन्ते तर्हि गोपदं व्यर्थं स्यात् । अतः एकैकस्य पदस्य किञ्चित् कृत्यम् अस्ति । तत्र च केषांचित् शब्दानां बोधः प्रातिपदिकाद्भवति, केषाञ्चित् प्रत्ययात् च । तस्मिन् विषये श्रीमन्नागेशभट्टविरचितां परमलघुमञ्जूषामाश्रित्य इदानीं विचारः क्रियते ।

नामार्थनिरूपणम्

वस्तुतः सुबन्तादाहत्य पञ्च अर्थाः प्रतीयन्ते-[2]

१. प्रवृत्तिनिमित्तम् (जातिः)
२. प्रवृत्तिनिमित्ताश्रयः (व्यक्तिः)
३. लिङ्गम्
४. संख्या
५. कारकम्

जातिः इति पदेन प्रवृत्तिनिमित्तं विवक्षितम् । व्यक्तिः इति पदेन प्रवृत्तिनिमित्ताश्रियो विवक्षितः । अनयोर्द्वयोः प्रतिपादकं प्रातिपदिकम् । प्रवृत्तिनिमित्तस्य तदाश्रयस्य च वाचकं बोधकं भवति प्रातिपदिकम् । प्रातिपदिकस्य इमौ द्वावर्थौ । तत्र मीमांसकाः वदन्ति- ''''''इमौ द्वावर्थौ प्रातिपदिकस्य न'''' इति । ते ब्रुवन्ति शब्दानां जातौ शक्तिर्लाघवात् तस्य तस्य शब्दस्य सा सा शक्तिर्विद्यते, यथा खड्गे असौ च छेदनशक्तिर्वर्तते, किन्तु यत्र खड्गः प्रयोक्तव्यः तत्र असिः न प्रयुज्यते । शब्दस्य शक्तिर्नाम अर्थप्रतिपादनसामर्थ्यमेव । एतादृशमर्थप्रतिपादकसामर्थ्यं शब्दस्य कुतो लब्धम् इति चेत् अस्माभिरेव दत्तम् । अस्माभिरित्युक्ते परम्परया व्यवस्थितम् । यथा, श्वेता इत्युक्ते शुक्लवर्णा इत्यर्थः । किन्तु श्वेता इति नाम स्वपुत्र्याः पित्रा क्रियते चेद् अत्र अयमर्थो न। तत्र सा शक्तिः तस्यां कल्पिता, तस्याः पित्रा नामकरणसमये ।

अस्ति शब्दस्य कस्मिंश्चिदर्थे शक्तिः । सा च शक्तिः अस्माभिः कथं ज्ञायते इति चेत् तत्र तदर्थमुपायाः सन्ति ये शक्तिग्रहोपायाः इत्युच्यन्ते, व्याकरणोपमानादयः । इदानीं कञ्चन जन्तुविशेषं प्रदर्श्य इयं गौरिति यदा पुत्राय पित्रा उपदिश्यते तदा स पुत्रः किं गृह्णाति ? गोपदस्य कथं शक्तिग्रहो भवति ? गोपदस्य अस्मिन् जन्तुविशेषे शक्तिरस्ति इति गृह्णाति वा, एतादृशे पदार्थे शक्तिरस्ति इति वा ? यदा शुक्लां गां प्रदर्श्य, इयं गौरित्युपदिश्यते चेत्, यदि अस्य शक्तिग्रहः प्रवृत्ति निमित्ताश्रये तर्हि (व्यक्तौ), कृष्णायां गवि गोपदस्य शक्तिरनेन न गृह्यते । एकैकां गां प्रदर्श्य इयं गौरियं गौरित्युपदेष्टव्यं स्यात् । न हि कश्चिद् एकैकं प्रवृत्तिनिमित्तकं पदार्थं गृहीत्वा इयमपि गौः इयमपि गौरिति यावत्यः गावः जगति सन्ति, तत्रैकैकां गां प्रदर्श्य प्रतिव्यक्तुपदेशं करोति । प्रतिव्यक्ति शक्तिग्रहणं न केनापि क्रियते । एवमेकवारं गृहीतया शक्त्या अन्यत्रापि शक्तिग्रहेण ज्ञायते – प्रातिपदिकस्य प्रवृत्तिनिमित्तबोधने एव शक्तिरस्ति, तदाश्रयबोधने नास्तीति । कुतो नास्तीति चेत् आश्रये शक्तिग्रहाभावात् । अत एवोक्तम्-शब्दस्य जातावेव शक्तिः इति । जातिश्चैका भवति । एतादृशशक्तिमत्यः सहस्रसंख्यकाः गावः सन्ति चेदपि तासु सर्वास्वपि अन्तर्भूतं गोत्वं त्वेकमेव इति लाघवात् । अन्यथा आश्रयाः अनन्ता इत्यतः एकैकेनाऽऽश्रयेण अस्य शक्तिरस्ति अस्य शक्तिरस्तीति पृथक् पृथक् बोधव्यम् इति गौरवम् । यदि जातौ शक्तिःतर्हि एकस्यां जातौ शक्तिर्गृह्यते चेत् तदाश्रयेषु सर्वेषु पदार्थेषु बोधः सिध्यति इति लाघवम् ।

अपि च, यदि व्यक्तौ शक्तिः स्वीक्रियते तर्हि एकस्यां व्यक्तौ गृहीता शक्तिः तत्रैव उपयुज्यते, अन्यस्यां नोपयुज्यते । यदि उपयुज्यते तर्हि घटं दृष्ट्वा अयं घटः इति यथा उपदिश्यते, तथैव पटं दृष्ट्वापि अयं घटः इति गृह्णीयाद् इति व्यभिचारदोषः ।

एतन्मीमांसकमतं खण्डयित्वा केवलव्यक्तौ शक्तिः इति वदन्ति वैयाकरणाः । यथा-

''आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।
शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति''[३] ॥

व्यक्तीनामानन्त्येऽपि, तासु व्यक्तिषु विद्यमानम् एकं सामान्यजातिम् उपलक्षणं कृत्वा शब्दस्य उपलक्षणीभूतजात्याश्रयसकलव्यक्तिसम्बन्धः सुकरः न च व्यभिचरिष्यति । सा उपलक्षणरूपा जातिः यत्र नास्ति तत्रायं शब्दः न प्रवर्तते इति । तर्हि पूर्वोक्तव्यभिचारदोषो नास्ति, आनन्त्यदोषोऽपि नास्ति ।

एवं मीमांसकानां केवलजातिवादमुद्भाव्य, केवलव्यक्तिशक्तिवादेन तस्य खण्डनं कृत्वा इदानीं विशिष्टशक्तिवादः उपस्थाप्यते । न केवलव्यक्तौ केवलजातौ वा शक्तिः, किन्तु जातिविशिष्टव्यक्तौ एव इति सिद्धान्तः, भाष्यं च प्रमाणम् ।

लिङ्गमपि नामार्थः-

यदि लिङ्गं प्रातिपदिकार्थः, सुबन्तात् लिङ्गप्रतीतिरपि भवति । प्रतीयमानं तल्लिङ्गं किं प्रातिपदिकस्यार्थो वा स्त्रीप्रत्ययादीनाम् अर्थो वा इति प्रश्नः । बालिका इत्युक्ते स्त्रीत्वं प्रतीयते, तच्च बालक इति प्रातिपदिकस्यार्थो वा टाप्[४] प्रत्ययस्यार्थो वा इति चेदुच्यते प्रातिपदिकस्यैवार्थः टापा बोध्यते इति द्योत्यते इति । प्रातिपदिकस्यैव अर्थः लिङ्गं क्वचित् प्रत्ययेन द्योत्यते, क्वचित् प्रत्ययं विनापि प्रतीयते ।

वाक्[५], उपानत्[६] इत्यादौ स्त्रीप्रत्ययं विनापि स्त्रीत्वं प्रतीयते । तच्च स्त्रीत्वं प्रातिपदिकार्थः इति लिङ्गस्य प्रातिपदिकार्थत्वं लब्धम् । पूर्वोक्तेषु वागुपानदादिशब्देषु लिङ्गस्य प्रातिपदिकत्वमवश्यं स्वीकर्तव्यम् । एकत्र लिङ्गं प्रातिपदिकार्थः अपरत्र प्रत्ययार्थः इति वक्तुं न शक्यते । सर्वत्र प्रातिपदिकमेव लिङ्गं शक्त्या बोधयति । परन्तु क्वचित् सा शक्तिः कुण्ठिता भवति । तत्र कञ्चन द्योतकः[७]अपेक्षितः । स्त्रीत्वं प्रत्ययवाच्यं चेत् प्रत्ययं विना कदाचिन्न प्रतीयेत । किन्तु वाक् इत्यादिषु स्त्रीत्वविशिष्टत्वं तु व्यवहारत एव, कोशादेरुपायाद्वा । ननु तत्र सुप्रत्ययः अस्ति किल इति चेत्, तादृशसुप्रत्ययतल्लोपप्रत्ययलक्षणादयः वैयाकरणानामेव खलु, प्रत्ययमजानतः अवैयाकरणस्यापि बोधो जायते । एवं च लिङ्गबोधकशक्तिः सर्वत्र प्रातिपदिकस्यैव । सा शक्तिः यत्र कुण्ठिता वर्तते, तत्र प्रत्ययानां द्योतकत्वेन आवश्यकता अस्ति ।

संख्या अपि नामार्थः-

यदि संख्या विभक्त्यर्थः तर्हि विभक्तेर्लोपे संख्यायाः प्रतीतिः न स्यात् । किन्तु तल्लोपेऽपि संख्याप्रतीतिरस्ति । तत्र सूत्रकारप्रमाणं वर्तते (संख्या अपि नामार्थः इत्यत्र) "'आदिर्ञिडुदवः"[८] इति सूत्रम् । आदिरित्येकवचनम् । ञिडुदवः इति बहुवचनम् । आदिः इत्येकवचने सत्यपि आदयः इत्यर्थः प्रतीयते । आदिः इत्येकवचनप्रत्यये कृतेऽपि वास्तविकी संख्या, बहुत्वसंख्या ञिडुदवः इत्येतदन्वयानुरोधेन प्रातिपदिकात्प्रतीयते। एवं संख्यापि नामार्थः ।

कारकमपि नामार्थः-

विभक्तिसत्वे कारकप्रतीतिर्वर्तते, किन्तु विभक्त्यभावे कारकस्य अप्रतीतिः इति वक्तुं न शक्यते । कुत इति चेत्, दधि तिष्ठति, दधि पश्य इत्यादौ दधि इति प्रातिपदिकाद् उत्तरत्र न कोऽपि प्रत्ययो दृश्यते । तथापि कर्त्रादिबोधः वर्तते । दधिकर्तृकस्थानक्रिया, दधिकर्मकदर्शनक्रिया इति । एवं विभक्त्यभावेऽपि कारकप्रतीतिरस्ति तस्माद्विभक्तिवाच्यं कारकम् इति वक्तुं न शक्यते । प्रातिपदिकमात्रसत्वेऽपि कारकप्रतीतिर्जायते (दधि इत्यादौ) इत्यस्मात् कारकमपि प्रातिपदिकार्थः, नामार्थः इति ।

सु, अम् इत्यादिविभक्तिप्रत्ययाः वैयाकरणैरेव प्रतीयन्ते, किन्तु प्रत्ययादिकार्यमजानन्नपि दधि इत्यादौ कर्तृत्वं[९], कर्मत्वं[१०] च गृह्णाति । क्वचित् प्रातिपदिके विद्यमानस्य कारकस्योद्बोधनाय विभक्तिरपेक्षिता । तत्र विभक्तेः द्योतकत्वमेव भवति (रामः, रामौ इत्यादौ)। एवं कारकमपि प्रातिपदिकार्थः ।

शब्दोऽपि नामार्थः-

इदानीं षष्ठोऽपि कश्चन अर्थः प्रातिपदिकस्य विद्यते इत्युच्यते । शब्दोऽपि शब्दस्यार्थः[११] इति । विशेषणतया शब्दोऽपि शाब्दबोधे भासते इति। ''युधिष्ठिर आसीत्'' इत्यादौ युधिष्ठिरः नास्माभिस्साक्षात्क्रियते तस्माच्छाब्दबोधे शब्दोऽपि भासते इति । शब्दोच्चारणं विना शब्दश्रवणं विना शब्दस्य बोधोऽपि न भवतीति । यथा सूर्यः स्वप्रकाशेन अन्यान्सर्वान् प्रकाशयति, अपि च स्वयमेव प्रकाशते तथा अर्थं प्रकाशयन् शब्दः आत्मानमपि प्रकाशयति । सः ग्राहकोऽपि भवति, ग्राह्योऽपि भवति । विषयीकृतः शब्दः, अर्थं विषयीकरोति । विषयीभवनं, विषयीकरणम् इत्युभयमपि शब्दस्य धर्मः । तदुक्तम्-

''ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥
विषयत्वमनाहत्य शब्दैनार्थः प्रकाश्यते'' [१३]॥ इति ।

तेजसः यथा ग्राह्यत्वं, ग्राहकत्वं इति द्वे शक्ती भवतः, यथा तेजः स्वयं प्रकाशते इतरपदार्थान् प्रकाशयति च, तथा एव सर्वेषामपि शब्दानाम् इदमेवशक्तिद्वयं बोध्यत्व-बोधकत्वरूपशक्तिद्वयं पृथक् अवस्थितम् । शब्दस्य स्वविषयत्वम् अनादृत्य कश्चन भिन्नः अर्थः कदापि न प्रकाश्यते, भासते इत्यर्थः । अर्थात् बोध्यत्वं बोधकत्वं च उभयं यथा तेजसः द्वे शक्ती भवतः तद्वत् शब्दस्यापि बोध्यत्वं बोधकत्वं च भवतः । नाम स्वशक्येन अर्थेन सह स्वरूपबोधकोऽपि भवति शब्दः । सर्वेऽपि शब्दाः एवं स्वार्थं, स्वरूपं च बोधयन्ति । एवं च शाब्दबोधे[१३] भाने न किमपि बाधकं भवति ।

नाम प्रातिपदिकम् । नाम्नः षडर्थः । यद्यपि-

''एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।
नामार्थोऽपि सर्वेऽमी पक्षाः शास्त्रे निरूपिताः''[१४] ॥

इत्यस्ति तथापि प्रवृत्तिनिमित्तं, तदाश्रयः, लिङ्गम्, संख्या, कारकमित्येतैः सह स्वरूपमपि नामार्थः इति प्रस्थापितम् । एते प्रातिपदिकस्यैव वाच्यार्थाः । क्वचित् विभक्तिस्त्रीप्रत्ययादिसमभिव्याहारे एव सा शक्तिरुद्भूता भवति, क्वचिच्च तद्विनापि । एवं च प्रकृतिरेव- प्रातिपदिकमेव सर्वस्याप्यर्थस्य वाचकः, प्रत्ययास्तु तत्र तत्र द्योतका एव । अतः यद्यपि पञ्चकं प्रातिपदिकार्थः इति सामान्यतः सिद्धान्तः, तथापि शब्दोऽपि शब्दस्यार्थः इति स्वीकृत्य षट्कं प्रातिपदिकार्थः इति पक्षेऽपि स्वीकार्यता सुसम्पन्ना ।

टिप्पणी

१. सुप्तिङन्तं पदम् (पा.सू-१.४.१४)
२. वै.भू.सा.
३. वै.भू.सा.नामार्थनिर्णयः
४. अजाद्यतष्टाप् (पा.सू-४.१.४)
५. वाक्(च्), वच्+क्विप्
६. उपानत्(ह्), उप+नह+क्विप्
७. प्रकाशकः
८. पा.सू-१.३.५
९. स्वतन्त्रः कर्ता(पा.सू-१.४.५४)
१०. कर्तुरीप्सिततमं कर्म(पा.सू-१.४.४९)
११. परमलघुमञ्जुषा
१२. वा.प.ब्रह्मकाण्डं,का-५५
१३. शब्दार्थज्ञानम्
१४. वै.भू.सा. नामार्थनिर्णयः,का-२५

सहायकग्रन्थाः

1. परमलघुमञ्जुषा,श्री नागेशभट्टः, चौखम्भा कृष्णदास् अकादमी, वाराणसी,२०११.
2. वैयाकरणभूषणसारः(प्रभा-दर्पणव्याख्योपेतः),श्री कौण्डभट्टः,श्रीबालकृष्णपञ्चोली,चौखम्भा संस्कृत संस्थान्,वाराणसी,२०१३.
3. वैयाकरणसिद्धान्तकौमुदी,श्री भट्टोजिदीक्षितः,चौखम्भा अमरभारती प्रकाशन्,वाराणसी, ९९७.
4. व्याकरणमहाभाष्यम्, पतञ्जलिः, चौखंभा सुरभारती प्रकाशन, वाराणसी, १९९५
5. अष्टाध्यायीसूत्रपाठः,संस्कर्ता-म.म.श्रीगुरुप्रसादशास्त्री,चौखम्बा,वाराणसी,२०१५.
6. शब्दमञ्जरी,विद्यासागर् के.एल्.वि.शास्त्री,वाद्यार् एण्ड् सन्स्,तृश्शूर्,१०१३.